श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

## वरदराज पञ्चाशात्

श्रीमान् वेङ्कट नाथार्यः कविताार्किक केसरी।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि॥

द्विरद शिखरि सीम्ना सद्मवान् पद्म योनेः
तुरग सवन वेद्यां श्यामलो हव्यवाहः।
कलश जलधि कन्या वल्लरी कल्प शाखी
कलयतु कुशलं नः कोऽपि कारुण्य राशिः॥१

यस्यानुभावम् अधिगन्तुम् अशक्नु वन्तो
मुह्यन्त् यभङ्गुर धियो मुनि सार्व भौमाः।
तस्यैव ते स्तुतिषु साहसम् अश्नुवानः
क्षन्तव्य एष भवता करि शैल नाथ॥२

जानन् ननादि विहितान् अपराध वर्गान्
स्वामिन् भयात् किमपि वक्तुमहं न शक्तः।
अव्याज वत्सल तथाऽपि निरङ्कुशं मां
वात्सल्यम् एव भवतो मुखरी करोति॥३

किं व्याहरामि वरद स्तुतये कथं वा
खद्योतवत् प्रलघु सङ्कुचित प्रकाशः।
तन्मे समर्पय मतिं च सरस्वतीम् च
त्वाम् अञ्जसा स्तुति पदैर् यदहं दिनोमि॥४

मच्छक्ति मात्र गणने किमिहास्ति शक्यं



rmvenkat@yahoo.com

शक्येन वा तव करीश किमस्ति साध्यम्
यद्यस्ति साधय मया तदपि त्वया वा
किं वा भवेद् भवति किञ्चिद् नीहमाने ॥५

स्तोत्रं मया विरचितं त्वदधीन वाचा
त्वत् प्रीतये वरद यत् तदिदं न चित्रम्।
आवर्जयन्ति हृदयं खलु शिक्षकाणाम्
मञ्जूनि पञ्जर शकुन्त विजल्पि तानि ॥६

यं चक्षुषाम् अविषयं हयमेध यज्वा
द्राघीयसा सुचरितेन ददर्श वेधाः।
तं त्वां करीश करुणा परिणामतस् ते
भूतानि हन्त निखिलानि निशामयन्ति ॥७

तत्तत् पदे रुपहितेऽपि तुरङ्ग मेधे
शक्रादयो वरद पूर्वम् अलब्ध भागाः।
अध्यक्षिते मखपतौ त्वयि चक्षुषैव
हैरण्य गर्भ हविषां रसम् अन्व भूवन् ॥८

सर्ग स्थिति प्रलय विभ्रम नाटि कायां
शैलूषवद् विविध वेष परिग्रहं त्वाम्।
संभावयन्ति हृदयेन करीश धन्याः
संसार वारिनिधि सन्तरणैक पोतम् ॥९

प्राप्तो दयेषु वरद त्वदनु प्रवेशात्
पद्मा सनादिषु शिवादिषु कञ्चुकेषु।
तन्मात्र दर्शन विलोभित शेमुषीकाः
तादात्म्य मूढ मतयो निपन्तन्त् यधीराः ॥१०

मध्ये विरिञ्चि शिवयोर् विहितावतारः
ख्यातोऽसि तत् समतया तदिदं न चित्रम्।

माया वशेन मकरादि शरीरिणम् त्वां
तावेन पश्यति करीश यदेष लोकः ॥११

ब्रह्मेति शङ्कर इतीन्द्र इति स्वराढिति
आत्मेति सर्वमिति सर्व चराचरात्मन् ।
हस्तीश सर्व वचसाम् अवसान सीमां
त्वां सर्व कारणम् उशन्ति अनपाय वाचः ॥१२

आशाधिपेषु गिरिशेषु चतुर्मुखेष्वपि
अव्याहता विधि निषेध मयी तवाज्ञा ।
हस्तीश नित्यम् अनुपालन लङ्घ नाभ्यां
पुंसां शुभाशुभ मयानि फलानि सूते ॥१३

त्राताऽऽपदि स्थिति पदं भरणं प्ररोहः
छाया करीश सरसानि फलानि च त्वम् ।
शाखागत त्रिदश बृन्द शकुन्तकानां
किं नाम नासि महतां निगम द्रुमाणाम् ॥१४

सामान्य बुध्दि जनकाश्च सदादि शब्दाः
तत्त्वान्तर भ्रम कृतश्च शिवादि वाचः ।
नारायणे त्वयि करीश वहन्ति अनन्यम्
अन्वर्थ वृत्ति परिकल्पित मैक कण्ठ्यम् ॥१५

सञ्चिन्तयन्ति अखिल हेय विपक्ष भूतं
शान्तोदितं शमवता हृत्दयेन धन्याः ।
नित्यं परं वरद सर्वगतं सुसूक्ष्मं
निष्पन्द नन्दथु मयं भवतः स्वरूपम् ॥१६

विश्वातिशायि सुखरूप यदात्मकस् त्वं
व्यक्तिं करीश कथयन्ति तदात्मिकां ते ।
येनाधि रोहति मतिस् त्वदु पासकानां
सा किं त्वमेव तव वेति वितर्क डोलाम् ॥१७



rmvenkat@yahoo.com

मोहान्धकार विनिवर्तन जागरूके
दोषा दिवाऽपि निरवग्रह मेधमाने
त्वत् तेजसि द्विरद शैलपते विमृष्टे
श्लाध्येत सन्तमस पर्व सहस्र भानोः ॥१८

रूढस्य चिन्मयतया हृदये करीश
स्तम्बानुकारि परिणाम विशेष भाजः ।
स्थानेषु जाग्रति चतुर्ष्वपि सत् त्वन्तः
शाखा विभाग चतुरे तव चातुरात्म्ये ॥१९

नागचलेश निखिलोपनिषन् मनीषा-
मञ्जूषिका मरकतं परिचिन्वतां त्वाम् ।
तन्वी हृदि स्फुरति काऽपि शिखा मुनीनां
सौदामनीव निभृता नव मेघ गर्भा ॥२०

औदन्वते महति सद्मनि भासमाने
श्लाघ्ये च दिव्य सदने तमसः परस्तात् ।
अन्तः कलेबरम् इदं सुषिरं सुसूक्ष्मं
जातं करीश कथ मादरणास्पदं ते ॥२१

बालाकृतेर् वट पलाश मितस्य यस्य
बृह्माण्ड मण्डलम् अभूद् उदरैक देशे ।
तस्यैव तद् वरद हन्त कथं प्रभूतं
वाराहम् आस्थितवतो वपुर् अद्भुतं ते ॥२२

भक्तस्य दानव शिशोः परिपालनाय
भद्रां नृसिंह कुहना मधि जग्मुषस् ते ।
स्तम्भैक वर्ज मधुनाऽपि करीश नूनम्
त्रैलोक्यम् एतद् अखिलं नरसिंह गर्भम् ।२३

क्रामन् जगत् कपट वामनताम् उपेतः



rmvenkat@yahoo.com

त्रेधा करीश स भवान् निदधे पदानि ।
अद्यापि जन्तव इमे विमलेन यस्य
पदोदकेन विधृतेन शिवा भवन्ति ॥२४

येनाचल प्रकृतिना रिपु संक्षयार्थी
वारां निधिं वरद पूर्वम् अलङ्घयस् त्वम् ।
तं वीक्ष्य सेतु मधुनाऽपि शरीर वन्तः
सर्वे षडूर्मि बहुलं ललधिं तरन्ति ॥२५

इत्थं करीश दुरपह्नव दिव्य भव्य-
रूपान् वितस्य विबुधादि विभूति साम्यात्
केचिद् विचित्र चरितन् भवतोऽवतारान्
सन्यान् दया परवशस्य वदन्ति सन्तः ॥२६

सौशील्य भावित धिया भवता कथञ्चित्
सञ्छादितानपि गुणान् वरद त्वदीयान् ।
प्रत्यक्षयन्ति अविकलं तव सन्निकृष्टाः
पत्युस् त्वषाम् इव पयोद वृतान् मयूखान्२७

नित्यं करीश तिमिराविल दृष्टयोऽपि
सिद्धाञ्जनेन भवतैव विभूषिताक्षाः ।
पश्यन्ति उपर्युपरि सञ्चरता मदृश्यं
माया निगूढम् अनपाय महानिधिं त्वाम् ॥२८

सद्यस् त्यजन्ति वरद त्वयि बध्द भावाः
पैतामहादिषु पदेष्वपि भाव बन्धम् ।
कस्मै स्वदेत सुख सञ्चरणोत् सुकाय
कारागृहे कनक शृङ्खलयाऽपि बन्धः ॥२९

हस्तीश दुःख विष दिग्ध फलानु बन्धिनि
आब्रह्म कीटं अपराहत संप्रयोगे ।
दुष्कर्म सञ्चय वशाद् दुरतिक्रमे नः

प्रत्यस्त्रम्  अञ्जलिर् असौ तव निग्रहास्त्रे ॥३०

त्वद् भक्ति पोतम् अवलम्बितुम् अक्षमाणां
पारं परं वरद गन्तु मनीश्वराणाम्।
स्वैरं लिलङ्घयिषतां भव वारि राशिं
त्वामेव गन्तुमसि सेतु रभङ्गुरस् त्वम्॥३१

अश्रान्त संसरण घर्म निपीडितस्य
भ्रान्तस्य मे वरद भोग मरीचिकासु।
जीवातु रस्तु निरवग्रहम् एधमानो
देव त्वदीय करुणामृत दृष्ट पातः॥३२

अन्तः प्रविश्य भगवन् अखिलस्य जन्तोः
आसेदुषस् तव करीश भृशं दवीयान्
सत्यं भवेय मधुनाऽपि स एव भूयः
स्वाभाविकी तव दया यदि नान्तरायः॥३३

अज्ञात निर्गमम् अनागम वेदिनं माम्
अन्धं न किञ्चिद् अवलम्बनम् अश्नुवानम्।
एतावतीं गमयितः पदवीं दयलोः
शेषाध्व लेश नयने क इवातिभारः॥३४

भूयोऽपि हन्त वसतिर् यदि मे भवित्री
याम्यासु दुर्विषह वृत्तिषु यातनासु।
सम्यग् भविष्यति ततः शरणा गतानां
संरक्षितेति बिरुदं वरद त्वदीयम्॥३५

पर्याकुलं महति दुःखः पयोनिधौ मां
पश्यन् करीश यदि जोषं अवस्थितस् त्वम्।
स्फारेक्षणेऽपि मिषति त्वयि निर्निमेषं
पारे करिष्यति दया तव दुर्निवारा॥३६

किं वा करीश कृपणे मयि रक्षणीये
धर्मादि बाह्य सहकारि गवेषणेन।
नन्वस्ति विश्व परिपालन जागरूकः
सङ्कल्प एव भवतो निपुणः सहायः॥३७

निर्यन्त्रणं परिणमन्ति न यावदेते।
नीरन्ध्र दुष्कृत भवा दुरित प्ररोहाः।
तावन्न चेत् त्वम् उपगच्छसि शार्ङ्ग धन्वा
शक्यं त्वयापि न हि वारयितुं करीश॥३८

यावन्न पश्यति निकामम् अमर्षणो मां
भ्रू भङ्ग भीषण कराल मुखः कृतान्तः।
तावत् पनन्तु मयि ते भगवन् दयालोः
उन्निद्र पद्म कलिका मधुराः कटाक्षाः॥३९

स त्वम् स एव रभसो भवदौ पवाह्यः
चक्रं तदेव शित धार महं च पाल्यः।
साधारणे त्वयि करीश समस्त जन्तोः
मातङ्ग मानुष भिदा न विशेष हेतुः॥४०

निर्वा पयिष्यति कदा करिशैल धामन्
दुर्वार कर्म परिपाक महा दवाग्निम्।
प्राचीन दुःखम् अपि मे सुखयन्निव त्वत्-
पादारविन्द परिचार रस प्रवाहः॥४१

मुक्तः स्वयं सुकृत दुष्कृत शृङ्ख लाभ्याम्
अर्चिर् मुखैर् अधिकृतैर् अतिवाहिताध्वा।
स्वच्छन्द किङ्करतया भवतः करीश
स्वाभाविकं प्रतिलभेय महाधि कारम्॥४२

त्वम् चेत् प्रसीदसि तवास्मि समीपतश्चेत्
त्वय्यस्ति भक्ति रनघा करिशैल नाथ।

संसृज्यते यदि च दास जनस् त्वदीयः ।
संसार एष भगवन् अपवर्ग एव ॥४३

आहूयमानम् अनपाय विभूति कामैः
आलोक लुप्त जगदान्ध्यम् अनुस्मरेयम् ।
आलोहितां शुकम् अनाकुल हेति जालं
हैरण्य गर्भ हयमेध हविर्भुजं त्वाम् ॥४४

भूयो भूयः पुलक निचितै रङ्गकैर् एधमानाः
स्थूल स्थूलान् नयन मुकुलैर् बिभ्रतो बाष्प बिन्दून् ।
धन्याः केचिद् वरद भवतः संसदं भूषयन्तः
स्वान्तैर् अन्तर् विनय निभृतैः स्वादयन्ते पदम् ते ॥४५

वरद तव विलोकयन्ति धन्याः
मरकत भूधर मातृकाय माणाम्
व्यपगत परिक्रम वारवाणं
मृगमद पङ्क विशेष नीलमङ्गम् ॥४६

अनिभृत परिरम्भैर् आहिताम् इन्दिरायाः
कनक वलय मुद्राम् कण्ठ देशे दधानः ।
फणिपति शयनीया दुत्थितस् त्वं प्रभाते
वरद सततम् अन्तर् मानसम् सन्निधेयाः ॥४७

तुरग विहग राज स्यन्दनान् दोलिकादिषु
अधिकम् अधिकम् अन्याम् आत्म शोभां दधानम् ।
अनवधिक विभूतिम् हस्ति शैलेश्वरम् त्वाम्
अनुदिनम् अनिमेषैर् लोचनैर् निर्विशेयम् ॥४८

निरन्तरं निर्विशतस् त्वदीयम्
अस्पृष्ट चिन्ता पदम् आभिरूप्यम्
सत्यं शपे वारण शैलनाथ
वैकुण्ठ वासेऽपि न मेऽभिलाषः ॥४९

व्यातन्वाना तरुण तुलसी दामभिः स्वामभिख्यां
मातङ्गाद्रौ मरकत रुचिं पुष्णती मानसे नः।
भोगैश्वर्य प्रिय सहचरैः काऽपि लक्ष्मी कटाक्षैः
भूयः श्यामा भुवन जननी देवता सन्निधत्ताम्॥५०

इति विहितम् उदारं वेङ्कटेशेन भक्त्या
शृति सुभगमिदम् यः स्तोत्रं अङ्गी करोति
करि शिखरि विटङ्क स्थायिनः कल्प वृक्षात्
भवति फलं अशेषं तस्य हस्तापचेयम्॥ ५१

कवितार्किक सिंहाय कल्याण गुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः

---

Please send your comments and suggestions to R.Venkat